# A-II/1/1370/21

## तृतीयसत्रार्द्धम्

## प्रथमपत्रम्

## वेदः

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. सर्वे प्रश्नाः समाधेयाः।** **(15×2=30)**

1. रुद्रः कः?
2. "नीलग्रीवा" कस्य विशेषणमस्ति?
3. "यक्ष्मा" इति शब्दस्य कोऽर्थः?

**अथवा**

"रयि" इति शब्दस्य कोऽर्थः?

4. "विलोहितः" इति शब्दस्य कोऽर्थः?
5. शुक्लयजुर्वेदे कति अध्यायाः सन्ति?
6. चतुर्दशाध्याये कति मन्त्राः सन्ति?

**अथवा**

ध्रुवम् इति शब्दस्य कोऽर्थः?

7. "दक्ष" इति शब्दः कस्मिन्नर्थे प्रयुज्यते?
8. "चतुर्दशाध्याये" कस्य यागस्य वर्णनं वर्त्तते?
9. "उर्ज" इति पदस्य कोऽर्थः?

**अथवा**

"नाक" इति शब्दस्य कोऽर्थः?

10. "द्रविणं" नाम किम्?
11. "ओजो" नाम किम्?
12. "गिरो" नाम किम्?

**अथवा**

पञ्चदशाध्याये कति मन्त्राः सन्ति?

13. यः रोदयति सः कः?

14. "मन्युः" इति शब्दस्य कोऽर्थः?

15. "इषव" इति शब्दस्य कोऽर्थः?

**अथवा**

"शिव" इति शब्दस्यार्थः कः?

**ब. सर्वे प्रश्नाः समाधेयाः।** **(6×5=30)**

16. याते रूद्र शिवातनूरघोरा. . . . . . . .इति मन्त्रं सस्वरं लिखत।

17. शिवेनव्वचसात्त्वागिरिशा. . . . . . . .इति मन्त्रं सस्वरं लिखत।

18. नमोऽस्तु नीलग्रीवाय. . . . . . . .इति मन्त्रं सस्वरं लिखत।

**अथवा**

नमः कपर्द्दिने. . . . . . . .इति मन्त्रं सस्वरं लिखत।

19. नमः सभाभ्यः. . . . . . . .इति मन्त्रं सस्वरं लिखत।

**अथवा**

परि ते धन्वनो. . . . . . . .इति मन्त्रं सस्वरं लिखत।

20. नमोगणेभ्यो. . . . . . . .इति मन्त्रं सस्वरं लिखत।

**अथवा**

मानस्तोकेतनयेमान. . . . . . . .इति मन्त्रं सस्वरं लिखत।

**स. दीर्घोत्तरीयः प्रश्नः समाधेयः।** **(1×20=20)**

21. पञ्चदशाध्यायस्य सारांशं लिखत।

**अथवा**

चित्तियागस्य महत्त्वं प्रतिपादयत।

# A-II/2/1371/21

## तृतीयसत्रार्द्धम्

## द्वितीयपत्रम्

## वेदः

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. सर्वे प्रश्नाः समाधेयाः।** **(15×2=30)**

1. कात्यायनश्रौतसूत्रे तृतीयकण्डिकायां कति सूत्राणि?
2. ध्रुवा का?
3. आहवनीयस्याग्नेः स्वरूपं किम्?
4. तृतीयाध्याये कति कण्डिकाः सन्ति?

**अथवा**

प्रत्याश्रावणं कः करोति?

5. किं कर्म सर्वमुपांशु कुर्वन्ति?
6. कति विधानि सूत्राणि?

**अथवा**

मङ्गलाग्निः कः?

7. यजुर्वेदस्योपवेदः कः?
8. पिष्टलेपहोमो कस्मिन्नग्नौ क्रियते?
9. अध्वर्युवेद इति कस्य संज्ञा?
10. नाभि देशे धारणमित्युक्तिः कस्य धारणे मता?

**अथवा**

यजतिदेशे ईशानाभिमुखः कस्तिष्ठेत्?

11. चतुरक्तं सवषट्कारासु सवषट्कारासुस्रुवेणाहुतिषु कतिधाज्यं गृह्णाति?
12. पात्रासादनं कस्मिन्नग्नौ क्रियते?

**अथवा**

ध्रुवा का?

13. जुह्वा का?

**अथवा**

नेष्टा को भवति?

14. होतृगणे कति सदस्याः ?

15. ध्रुवः इति सूत्रानुसारं कुत्र नापसरेत् ?

**ब. सर्वे प्रश्नाः समाधेयाः।** **(5×6=30)**

16. वसुभ्य इति प्रतिमन्त्रं स्पष्टयत।

**अथवा**

मुखं विमृष्टे इति सूत्र विवेचयत।

17. यजयजेति शैषमिति व्याख्यायताम्।

18. अस्तु श्रौषडित्यग्नीत् इति सूत्रं विशदयत।

**अथवा**

इडां च सूत्रमिदं व्याख्येयम्।

19. व्रतं विसृजतेयेनोपेयात्।

**अथवा**

उपांशु चरन्तीति सूत्रं विवृणुत।

20. पत्न्यन्वारभतेऽध्वर्युमिति स्पष्टयत।

**स. दीर्घोत्तरीयः प्रश्नः समाधेयः।** **(1×20=20)**

21. पौर्णमासयागः विवेच्यः।

**अथवा**

सामिधेनीनां प्रयोगं यथाक्रमं विवृणुत।

# A-II/3/1372/21

## तृतीयसत्रार्द्धम्

## तृतीयपत्रम्

## वेदः

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. सर्वे प्रश्नाः समाधेयाः।** **(15×2=30)**

1. जैमिनीयन्यायमालायाः आरम्भे कस्य स्तुतिं करोति माधवाचार्यः?
2. माधवाचार्यः ग्रन्थारम्भे कस्य राज्ञः विषये वदति?
3. द्वादशलक्षणी इत्यस्य कोऽर्थः?
4. शुक्लयजुर्वेदे कति अध्यायाः सन्ति?

   **अथवा**

   ईशावास्योपनिषदि कति मन्त्राः सन्ति?
5. 'यस्तु सर्वाणि भूतानि' इति मन्त्रं पूरयत।
6. स्वाध्यायविधिविचारः कस्मिन् अध्याये वर्तते?
7. कौमारिलमतस्य अपरं नाम किम्?
8. द्वितीयाध्याये कति पादाः सन्ति?
9. गुणविधेः उदाहरणं लिखत।
10. पादश्च गीतिरिति कस्य लक्षणम् उक्तम्?
11. षण्णाम् आस्तिकदर्शनानां नामानि लिखत।

    **अथवा**

    उपांशुयागे देवता का भवति?
12. ब्राह्मणानाम् अग्न्याधानकालः कः?

    **अथवा**

    सिद्धान्तपक्षे मन्त्राणाम् उच्चारणं दृष्टप्रयोजनम् उत अदृष्टप्रयोजनम्?
13. मीमांसाशास्त्रस्य प्रथमं सूत्रं किम्?

    **अथवा**

    श्रुतिमत्प्रसङ्गचरितः इति कस्य विषये वक्ति माधवाचार्यः?

14. प्रथमाध्याये कति पादाः सन्ति ?

**अथवा**

शास्त्रे त्रिधा सङ्गतिः काः भवन्ति ?

15. मीमांसाशास्त्रे कति मतानि सन्ति ?

**ब. सर्वे प्रश्नाः समाधेयाः।** **(5×6=30)**

16. 'दृष्टं वरमदृष्टतः' इति वाक्यं प्रतिपादयत।

**अथवा**

वेदापौरुषेयत्वं न्यायमालादिशा स्पष्टयत।

17. ईशावास्योपनिषदः आदितः मन्त्रचतुष्टयं लिखत।

18. 'साधूनेव प्रयुञ्जीत' इति वाक्यं न्यायमालादिशा संक्षेपेण स्पष्टयत।

**अथवा**

'वायुर्वै क्षेपिष्ठा देवता' इति अर्थवादवाक्यं विवृणुत।

19. ऋक्सामयजुषां लक्षणं प्रतिपादयत।

**अथवा**

वाक्यभेददोषं स्पष्टयत।

20. प्रशंसाधिकरणे प्रोक्तं 'अपशवो वा अन्ये गो अश्वेभ्यः' इति वाक्यं स्पष्टयत।

**स. एकः दीर्घोत्तरीयप्रश्नः समाधेयः।** **(1×20=20)**

21. 'स्वाध्यायोऽध्येतव्यः' इति विधिं यथाग्रन्थं प्रतिपादयत।

**अथवा**

अर्थवादानां प्रामाण्यं प्रतिपादयत।

# A-II/4/1373/21

## तृतीयसत्रार्द्धम्

## चतुर्थपत्रम्

## वेदः

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. सर्वे प्रश्नाः समाधेयाः।** **(15×2=30)**

1. निरुक्तशास्त्रे कति अध्यायाः सन्ति?

2. निरुक्तं कतिविधम्?

3. चतुर्थाऽध्याये कति पादाः सन्ति?

**अथवा**

सामवेदस्य ऋत्विक् कः?

4. गोपथब्राह्मणं कस्य वेदस्य?

5. अग्नेः नामान्तराणि लिखत।

6. "वर्णागमोवर्णविपर्ययश्च. . . . . ." इति श्लोकं पूरयत।

**अथवा**

"अग्नि" इति शब्दस्य निर्वचनं क्रियत।

7. निरुक्तशास्त्रे कति काण्डानि सन्ति?

8. नास्तिकः कः?

9. षडङ्गेषु निरुक्तस्य स्थानं किम्?

**अथवा**

"तितउ" इति शब्दस्य कोऽर्थः?

10. हस्तौ किं पठ्यते?

11. निर्वचनं नाम किम्?

**अथवा**

"मर्या" इति शब्दस्य कोऽर्थः?

12. वेदानां श्रोत्रं किम्?

13. उच्चारणनियमाः कुत्र वर्तन्ते?

**अथवा**

"रिप्रम्" इत्यस्य कोऽर्थः?

14. ऋग्वेदस्य ऋत्विक् कः?

15. निघण्टुग्रन्थे कत्यध्यायाः सन्ति?

**ब. सर्वे प्रश्नाः समाधेयाः। (5×6=30)**

16. "सक्तुमिवतितउना" इति ऋचं पूरयित्वा व्याख्यात।

17. निधा पाश्या भवतीति स्पष्टयत।

**अथवा**

"को नु मर्या अमिथितः. . . . ." इति ऋचं पूरयत।

18. यास्काचार्यस्य प्राचीनत्वं स्पष्टयत।

**अथवा**

"अदितिर्द्यौरदितिरन्तरिक्ष. . . . ." इति ऋचं पूरयित्वा निरुक्तशास्त्राधारेण व्याख्यात।

19. "गौः, गातुः, दसयः" एतेषां पदानां निर्वचनं कुरुत।

**अथवा**

ऋधक्, वावशानः, अन्धः, श्वात्रम् एतेषु त्रयाणां पदानां निर्वचनं कुरुत।

20. "चत्वारिश्रृंगात्रयोऽस्यपादाः" इति ऋचं पूरयित्वा शास्त्राधारेण व्याख्यात।

**स. एकः प्रश्नः समाधेयः। (1×20=20)**

21. निरुक्तस्य महत्त्वं सविस्तरेण प्रतिपाद्यताम्।

**अथवा**

निरुक्तशास्त्रपठनस्य आशयः किम्? इति प्रतिपाद्यताम्।

# A-II/5/1374/21

## तृतीयसत्रार्द्धम्

## पञ्चमपत्रम्

## वेदः

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. सर्वे प्रश्नाः समाधेयाः।** **(15×2=30)**

1. बृहदारण्यकं केन वेदेन सम्बद्धम्?
2. शांखायनब्राह्मणे कति अध्यायाः सन्ति?
3. ब्राह्मणग्रन्थे प्रतिपाद्यविषयाः के?

**अथवा**

गोपथब्राह्मणं केन वेदेन सम्बद्धम्?

4. महीवेदः कस्य वेदस्य अपरं नाम किम्?
5. कल्पसूत्रं कतिविधम्?
6. निरुक्ते कति अध्यायाः सन्ति?

**अथवा**

सायणाचार्यस्य भाष्यस्य नाम किम्?

7. महीधरभाष्यस्य नाम किम्?
8. ऋग्वेदे कति मन्त्राः सन्ति?
9. ऋग्वेदस्य प्रथमभाष्यकारः कः?

**अथवा**

ऋग्वेदस्य प्रातिशाख्यस्य नाम किम्?

10. हलायुधकृतकाण्वसंहितायाः भाष्यस्य नाम किम्?
11. "ज्ञानयज्ञ" नामक भाष्यस्य कर्त्ता कः?
12. "ओरायन" ग्रन्थस्य कर्त्ता कः?

**अथवा**

"जर्भरी" इति शब्दस्य कोऽर्थः?

13. "अध्वरं भुनक्ति" इति कस्य व्युत्पत्तिः?

14. "अनयताक्षरावसानो". . . . . . . . . ?

15. "ऋच्यते स्तूयतेऽनया इति. . . . . . . . ?"

**अथवा**

"सरमा" इति शब्दस्य कोऽर्थः?

**ब. सर्वे प्रश्नाः समाधेयाः।** **(5×6=30)**

16. षोडशसंस्काराणां नामानि लिखत।

17. वेदाङ्गेषु कल्पसूत्राणां नामानि लिखत।

18. सामवेदस्य महत्त्वं लिखत।

**अथवा**

सामवेदस्य स्वरूपं प्रतिपादयत।

19. अथर्ववेदस्य महत्त्वं प्रतिपादयत।

**अथवा**

महीधरस्य परिचयं लिखत।

20. काण्वसंहितायाः परिचयं लिखत।

**अथवा**

शुक्लयजुर्वेदस्य विषय-वस्तु प्रतिपादयत।

**स. दीर्घोत्तरीयः प्रश्नः समाधेयः।** **(1×20=20)**

21. ईशावस्योपनिषादः परिचयं प्रस्तुवत।

**अथवा**

वेदाङ्गसाहित्यस्य परिचयं लिखत।